दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णचतुर्थी
ज्येष्ठ २१ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-५ ■ वर्ष-५ ■ अङ्क-२२२ | १ | जून ०४, २०२६ | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

२ देहलीनगरस्य मालवीयनगरे विश्रान्तिनिलये भीषणाग्निकाण्डः, एकविंशतिः जनाः मृताः

३ ७१४ पी. जी. टी., १०२ डी. पी. ई. पदानां च कृते शीघ्रं भविष्यति एल. डी. आर. नियुक्तिप्रक्रिया- रोहितठाकुरः

५ निजीविद्यालयाः प्रतिवर्षं केवलं पञ्चप्रतिशतं शुल्कमेव वर्धयितुं शक्नुवन्ति, विगतत्रिभ्यः वर्षेभ्यः वर्धितं अतिरिक्तशुल्कं प्रतिप्रदेयम् भविष्यति

## केन्द्रीयमन्त्रिमण्डलेन विमानन-परिवहन-मार्ग-आधारभूतसंरचनाक्षेत्रेषु एटीएफ-मूल्यस्य स्थिरीकरणार्थं तैलविपणनसमवायेभ्यः सहस्रकोटिरूप्यकाणां-आयव्ययसहायतां प्रदातुं कतिपयाः महत्त्वपूर्णाः योजनाः अनुमोदिताः



केन्द्रीयमन्त्रिमण्डलेन विमानन परिवहन-मार्ग-आधारभूतसंरचनाक्षेत्रेषु कतिपयाः महत्त्वपूर्णाः योजनाः अनुमोदिताः। पश्चिम-एशियासंकटकारणेन वर्धितेषु इन्धनमूल्येषु भारतीयविमानसेवानां कृते विमान-ईन्धनस्य अर्थात् एटीएफ-मूल्यस्य स्थिरीकरणार्थं तैलविपणन-समवायेभ्यः सहस्रकोटिरूप्यकाणां आयव्ययसहायतां प्रदातुं प्रशासनं निर्णयम् कृतवत् । सूचना-प्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् एतेन विमाननक्षेत्रसम्बद्धाः प्रायः सप्तसप्ततिलक्ष-आजीविकाः सुरक्षिताः भविष्यन्ति। एषा सहायता योजना षट्त्रिंशन्मासपर्यन्तं प्रवर्तिष्यते । मन्त्रिमण्डलेन दिल्ली-निकटवर्ति क्षेत्रे वायुप्रदूषणनियन्त्रणार्थम् अपि एकस्याः बृहत्याः योजनायाः अनुमोदनं कृतम्। नवसहस्र-पञ्चशत-पञ्चाशीति-कोटिरूप्यक-व्यययुक्तायाः अस्याः योजनायाः अन्तर्गतं बीएस-चतुर् अथवा तत्पूर्वमानकयुक्ताः ट्रक-बसयानानि बीएस-षट् अथवा विद्युत्चालितयानैः प्रतिष्ठास्यन्ते। द्विवर्षीय योजनायां प्रायः द्विलक्षं ट्रकयानानि षोडशसहस्रं बसयानानि च प्रतिष्ठापयितुं लक्ष्यं निर्धारितम्। आर्थिकसम्बद्धया मन्त्रिमण्डलीयसमित्या ओडिशाराज्ये रामेश्वरात् पारादीपपर्यन्तं त्रिषष्ट्यधिक-शतकिलोमीटर-परिमितस्य नूतनतटीय राजमार्गनिर्माणाय अनुमतिः प्रदत्ता। अष्टसहस्रत्रिशत-कोटिरूप्यकाधिक-व्यययुक्तायाः अस्याः परियोजनायाः सम्पन्नतया उभयोः स्थानयोः मध्ये यात्राकालः प्रायः सार्धद्विहोरा न्यूनीभविष्यति। एतदतिरिक्तं समित्या बिहारराज्ये राष्ट्रीयराजमार्गयोः एकत्रिंशत् तथा एकत्रिंशत् अधिक द्विशतस्य च इत्येतयोः खगड़िया-पूर्णिया-खण्डस्य चतुर्-पथ-परियोजनापि अनुमोदिता। प्रायः त्रिसहस्र-नवशत-षट्त्रिंशत्-कोटिरूप्यक-व्यययुक्ता एषा परियोजना राज्यस्य प्रमुखाणां आर्थिक-सामाजिककेन्द्राणां मध्ये सम्पर्कं सुदृढं करिष्यति।

## राष्ट्रपतिः द्रौपदीमुर्मूः राष्ट्रिय-आदिवासिसम्मेलनस्य उद्घाटनं कृतवती



राष्ट्रपतिः द्रौपदीमुर्मूः राष्ट्रिय-आदिवासिसम्मेलनस्य उद्घाटनं कृतवती। नवदेहल्याम् आयोजितायाम् एकीकृतजनजातीय-विकाससमवायानां तथा एकीकृतजनजातीय-विकासायोगस्य च विस्तारविषयिकायां समायोजितायां सभायां राष्ट्रपतिः अवदत् यत् देशव्यापिनः जनजातीयसमाजस्य संस्कृतिः अत्यन्ता समृद्धा अस्ति, अतः जनजातीयसमुदायस्य उन्नत्यर्थाः विशेषप्रयत्नाः करणीयाः। तया उक्तं यत् विकासकार्याणि अन्तिमगृहं यावत् अन्तिमग्रामं यावत् च अवश्यं प्राप्नुयुः। राष्ट्रपतिः चिन्ताम् अपि व्यक्तवती यत् अद्यापि केचन जनजातीयवर्गाः शासनस्य विविधाभिः योजनाभिः अनभिज्ञाः सन्ति । राष्ट्रपतिः सर्वासां संस्थानां हितधारकान् आहूतवती यत् जनजातीययुवभ्यः सम्मानजनकजीविकायाः तथा प्रत्येकं जनजातीयबालकाय विद्यालयशिक्षायाः सुनिश्चितीकरणं क्रियताम्। तया एतदपि प्रतिपादितं यत् जनजातीययुवानः क्रीडाकलापेषु सहभागितायै प्रोत्साहिताः भवेयुः।

## पश्चिमबङ्गालस्य तृणमूल कांग्रेसदलात् निष्कासितः टी.एम्.सी. विधायकः ऋतव्रत बनर्जी इत्यनेन उक्तं यत् तस्य पक्षे प्रायः षष्टिः विधायकाः सन्ति



पश्चिमबङ्गालस्य पूर्वसत्तारूढदले तृणमूलकाङ्ग्रेले आन्तरिकमतभेदाः प्रतीताः। दलात् निष्कासितः टी.एम्.सी. विधायकः ऋतव्रत बनर्जी इत्यनेन उक्तं यत् तस्य पक्षे प्रायः षष्टिः विधायकाः सन्ति। अस्य कथनस्य कारणेन राज्यविधानसभायां सत्तासन्तुलनपरिवर्तनस्य सम्भावनं प्रति चर्चाः तीव्राः प्राप्ताः । तस्य समूहेन विधानसभायाः -अध्यक्षाय रथेन्द्र बोस महोदयाय पत्रं प्रेषितं स्वदलस्य "वास्तविक-तृणमूलकाङ्ग्रेस" इति नाम्ना मान्यतां दातुम् आग्रहः कृतः। प्रत्युत्तररूपेण तृणमूलकाङ्ग्रेसेण शोभनदेव चट्टोपाध्यायः सदनस्य नेता, आशिमा पात्रा तथा नयना बन्दोपाध्यायः उपनेत्र्यौ, फिरहाद हकीमः च मुख्यसचेतकरूपेण घोषिताः। अस्मिन्नन्तरे पूर्वमुख्यमन्त्री ममता बनर्जी कोलकातानगरे आयोजितायां जनसभायां भारतीयजनतापार्टी इत्यस्य उपरि दलविभाजनस्य षड्यन्त्ररचनायाः आरोपं कृतवती। एतेषां राजनैतिकघटना-क्रमाणां प्रति सम्पूर्णराज्यस्य दृष्टिः केन्द्रीभूता वर्तते ।

## भारतं पञ्चविंशत्यधिकद्विसहस्रतमे वर्षे विश्वस्य द्वितीयं बृहत्तमं सौरविकासविपणकम् अभवत्

वार्षिक-सौर-क्षमतावृद्धौ भारतं अमरीकाम् अतिक्रमितवत्। भारतं पञ्चविंशत्यधिकद्विसहस्रतमे वर्षे विश्वस्य द्वितीयं बृहत्तमं सौरविकासविपणकम् अभवत्। भारते स्थापित-सौर-क्षमतायाः उल्लेखनीयं पञ्चपञ्चाशत्यधिकशत् गीगावाट्-परिमितं अतिक्रमितम् अस्ति, येन देशस्य पञ्चाशत् प्रतिशतं जीवाश्मविहीन इन्धन-क्षमतायाः लक्ष्यं साधयितुं, नियतसमयात् पूर्वमेव तस्य राष्ट्रिय-निर्धारितं योगदानं पूरयितुं च साहाय्यं भवति। केन्द्रीय-नवीन-नवीकरणीय ऊर्जा-मन्त्री प्रल्हाद-जोशी-वर्यः उक्तवान् यत् देशस्य सौर-विकासगाथा वैश्विक मानदण्डानि स्थापयति, सुदृढ-नीति-समर्थनेन, नवान्वेषणस्य, विश्व-स्तरीय-आधारिक संरचनायाः च माध्यमेन अभिलेख-क्षमतावर्धनानि च प्रेरयति।

## सुभाषितम्

**रोगशोकपरिताप-**
**बन्धनव्यसनानि च।**
**आत्मापराधवृक्षाणां**
**फलान्येतानि देहिनाम्॥**

भावार्थः- रोग, शोक, पश्चाताप, बन्धन और आपत्ति, ये देहधारियों (प्राणियों) के लिए अपने अपराधरूपी वृक्ष के फल हैं।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## कर्नाटकराज्यस्य नूतनमुख्यमन्त्री डी. के. शिवकुमारः शपथग्रहणं कृतवान्



कर्नाटकराज्यस्य नूतनमुख्यमन्त्री डी. के. शिवकुमारः शपथग्रहणं कृतवान्। कर्नाटकराज्ये काङ्ग्रेस-विधानमण्डल-दलस्य नेता डी.के. शिवकुमारः बेङ्गलूरुनगरे राज्यस्य पञ्चविंशतितमः मुख्यमन्त्रिरूपेण शपथग्रहणं कृतवान्। राज्यपालः थावरचन्द-गहलोतः तस्मै पदस्य गोपनीयतायाश्च शपथं प्रदापितवान्। वरिष्ठकाङ्ग्रेसनेता डॉ. जी. परमेश्वरः उपमुख्यमन्त्रिपदेन शपथं गृहीतवान्, अन्ये च द्वादश मन्त्रिणः अपि मन्त्रिपरिषदि सम्मिलिताः। प्रधानमन्त्री नरेन्द्रमोदी, मुख्यमन्त्रिणे शुभकामनाः प्रदत्तवान्।

# हिमाचलप्रदेशस्य चतुर्षु नगरनिगमेषु महापौरपदं पञ्चवर्षाणि यावत् अनारक्षितं स्थास्यति, सर्वकारेण अधिसूचना प्रख्यापिता




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य चतुर्षु नगरनिगमेषु सम्पन्नानां निर्वाचनानां पश्चात् महापौरपदस्य आरक्षणरोस्टर- विषये राज्यसर्वकारेण एकः महत्तरः निर्णयः स्वीकृतः अस्ति। सोलन- पालमपुर- मण्डी- धर्मशाला- नगरनिगमानां महापौरपदाणि पञ्चवर्षाणाम् अवधेः कृते अनारक्षितानि स्थास्यन्ति। अस्मिन् विषये बुधवासरे नगरविकासविभागेन अधिसूचना निर्गता। उल्लेखनीयं वर्तते यत् मङ्गलवासरे नगरविकासविभागस्य प्रधानसचिवेन देवेशकुमारेण रोस्टर-सञ्चिकायां हस्ताक्षरं कृतम् आसीत्। त्रिषष्टि (६३) वार्डक्षेत्रेषु नूतनाः पार्षदाः निर्वाचिताः। हिमाचलप्रदेशस्य चतुर्षु नगरनिगमेषु निर्वाचनपरिणामाः घोषिताः अभवन्, त्रिषष्टिः (६३) वार्ड-क्षेत्रेषु च नूतनाः पार्षदाः निर्वाचिताः सन्ति। अतः परं राजनैतिकदलानां, निर्वाचितानां पार्षदानां, सम्भाव्यदावेदकानां च दृष्टिः महापौरपदस्य आरक्षणरोस्टर-उपरि एव स्थिता आसीत्। निर्वाचनप्रक्रियायाः समाप्तौ सत्यामपि राज्यसर्वकारेण महापौरपदस्य आरक्षणरोस्टर- विषये कोऽपि निर्णयः न स्वीकृतः आसीत्। रोस्टर- अनिर्गमनात् बहवः सम्भाव्यदावेदकाः राजनैतिकदलाः च स्वकीयां अन्तिमां रणनीतिं निश्चितं कर्तुं न शक्नुवन्ति स्म। अनेन निर्वाचितानां पार्षदानां मध्येऽपि महापौरपदं प्रति अनिश्चितता व्याप्ता आसीत्। नगरविकासविभागेन प्रस्तावं सज्जीकृत्य विधिविभागाय प्रेषितम् आसीत्। ततः सञ्चिकायाः आगमनात् परं इदानीम् एषा अधिसूचना प्रख्यापिता अस्ति।

# देहलीनगरस्य मालवीयनगरे विश्रान्तिनिलये भीषणाग्निकाण्डः, एकविंशतिः जनाः मृताः



दिल्लीनगरस्य मालवीयनगरे विश्रान्तिनिलये भीषणाग्निकाण्डः, एकविंशतिः जनाः मृताः। राष्ट्रीयराजधान्याम् देहल्यां मालवीय-नगरक्षेत्रस्य एकस्मिन् विश्रान्तिनिलये भीषणाग्निकाण्डे एकविंशतिः जनाः मृत्युमुपगताः। अनेके च जनाः आहताः अभवन्। दक्षिणदिल्ल्यारक्षि विभागस्य उपायुक्तः अनन्तमित्तलः अवदत् यत् अग्निशमनविभागस्य अष्टभिः वाहनैः सह अग्निः नियन्त्रितः। आरक्षिणां अग्निशमनस्य तथा अन्य- आपत्कालिकसेवानां संयुक्तप्रयत्नैः चत्वारिंशदधिकाः जनाः सुरक्षितरूपेण उद्धृताः चिकित्सोपचारार्थं च चिकित्सालयेषु प्रेषिताः। प्रधानमन्त्री नरेन्द्रमोदी घटनायाः विषये गहनं दुःखं व्यक्तीकृतवान् । तेन मृतकाणां परिजनानां कृते प्रधानमन्त्रिराष्ट्रिय- राहतनिधेः द्वि-द्वि लक्षरूप्यकाणि तथा आहतानां कृते पञ्चाशत्-पञ्चाशत् सहस्ररूप्यकाणां आर्थिकसहायतायाः घोषणा कृता। राष्ट्रपतिः द्रौपदीमुर्मुः, उपराष्ट्रपतिः सी.पी. राधाकृष्णन्, गृहमन्त्री अमितशाहः तथा दिल्लीराज्यस्य मुख्यमन्त्री रेखा गुप्ता अपि अस्मिन् दुःखदे घटनाक्रमे शोकं प्रकटितवन्तः। सर्वैः नेतृभिः शोकसन्तप्तपरिजनान् प्रति गहनसंवेदना व्यक्ता, आहतानां शीघ्रस्वास्थ्यलाभाय च प्रार्थना कृता।

# हिमाचलस्य सर्वेषु विद्यालयेषु अधुना दिसम्बरमासे भविष्यन्ति अबोर्ड-कक्षाणां वार्षिकपरीक्षाः, सभायाम् अभवत् निर्णयः

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशस्य सर्वेषु राजकीयविद्यालयेषु अधुना अबोर्ड-कक्षाणां वार्षिकपरीक्षाः दिसम्बरमासे आयोजयिष्यन्ते। सम्प्रति ग्रीष्मकालीन- अवकाशयुक्तेषु विद्यालयेषु एताः परीक्षाः मार्च-मासे भवन्ति स्म। अप्रैलमासे अत्र नूतनशैक्षणिकसत्रं प्रारभ्यते स्म। शीतकालीनविद्यालयेषु तु पूर्वतः एव दिसम्बरमासे वार्षिकपरीक्षाः प्रचलन्त्यः सन्ति। अधुना नवीनव्यवस्थायाः अन्तर्गतं सम्पूर्णे प्रदेशे अबोर्ड-कक्षाणां नूतनं सत्रं (एकस्मिन् एव समये) प्रारप्स्यते। बुधवासरे शिक्षामन्त्रिणः रोहितठाकुरस्य अध्यक्षतायां सचिवालये आयोजिते समीक्षा- उपवेशने एषः निर्णयः स्वीकृतः।

## मन्दप्रदर्शने रोधितुं शक्यते शिक्षकाणां वेतनवृद्धिः

शिक्षामन्त्रिणा कथितं यत् हिमाचलप्रदेश- स्कूल- शिक्षा- बोर्ड इत्यस्य दशम- द्वादशकक्षयोः परीक्षापरिणामानां विस्तीर्णं विश्लेषणं करिष्यते। सः अधिकारिणः उत्तरदायित्वं सुनिश्चितं कर्तुम् आदिष्टवान्। तेन प्रतिपादितं यत् निरन्तरं मन्दप्रदर्शनं (असंतोषजनककार्यम्) कुर्वताम् शिक्षकाणां वार्षिकी वेतनवृद्धिः रोधितुं शक्यते। सः जैवमितीयाम् (बायोमेट्रिक) उपस्थितिम् अनिवार्यां कर्तुम्, अनुपालनाभावस्य स्थितौ वेतनकर्तनम् इति सदृशेषु पदेषु च बलम् अददत्। शिक्षामन्त्रिणा विभागः उपनिदेशकानां पदोन्नतिसम्बद्धायाः विभागीयपदोन्नतिसमित्याः औपचारिकताः शीघ्रं पूरयितुं निर्देशितः।

**उद्योगैः सह कार्यं कुर्वद्भिः छात्रैः प्राप्स्यते वृत्तिः-** उपवेशने निर्णयः गृहीतः यत् स्नातकपदवीं पूर्णां कृतवद्भ्यः छात्रेभ्यः शिल्पशिक्षुता समाहिता पदवी प्रारप्स्यते। अस्य प्रयासस्य अन्तर्गतं छात्राः विभिन्नेषु उद्योगेषु कार्यं कर्तुम् अवसरं प्राप्स्यन्ति, तेभ्यः वृत्तिः चापि प्रदास्यते। अनेन तेषां कौशलविकासस्य सहैव उद्योगस्य सम्भावनाः अपि वर्धिष्यन्ते।

## महाविद्यालेषु पाठयिष्यन्ते विदेशीभाषाणां पाठ्यक्रमाः

शिक्षामन्त्रिणा अवोचत् यत् महाविद्यालयस्तरे विदेशीभाषाणां पाठ्यक्रमाणां प्रारम्भाय योजना वर्तते, येन छात्राः वैश्विकस्तरीयं भाषादक्षतां प्राप्स्यन्ति, अन्ताराष्ट्रिय- जीविकायाः अवसराः उपलप्स्यन्ते। अस्याः योजनायाः अन्तर्गतं 'बी. वॉक' (B.Voc) इत्यस्मिन् चत्वारः नूतनाः पाठ्यक्रमाः प्रारब्धुं सज्जता वर्तते।

# अरावलीपर्वतश्रेण्याः सीमाङ्कनसमीक्षार्थं सर्वोच्चन्यायालयेन विशेषज्ञसमितिः निर्मिता



अरावलीपर्वतश्रेण्याः सीमाङ्कन- समीक्षार्थं सर्वोच्चन्यायालयेन विशेषज्ञसमितिः निर्मिता। सर्वोच्च- न्यायालयेन अरावलीपर्वतश्रेण्याः परिभाषा-सीमाङ्कन-सम्बद्धविषयाणां स्वतन्त्रसमीक्षार्थम् उच्चाधिकार- युक्तायाः विशेषज्ञसमितेः घटनस्य निर्देशः प्रदत्तः। अस्याः समितेः अध्यक्षतां भारतीय-वानिकी- अनुसन्धान-शिक्षापरिषदः महा- निदेशिका कञ्चनदेवी वहिष्यति। न्यायालयेन समितये चालितवर्षस्य अगस्तमासस्य एकत्रिंशत्तमदिनाङ्क- पर्यन्तं स्वप्रतिवेदनं समर्पयितुम् आदेशः प्रदत्तः। सर्वोच्चन्यायालयेन उक्तं यत् अरावली- पारिस्थितिकतन्त्रस्य संरक्षणसम्बद्धानां महत्त्वपूर्णप्रश्नानां समाधानार्थं निष्पक्षं वैज्ञानिकं तथ्याधारितं च मूल्याङ्कनम् अत्यावश्यकम् अस्ति। उल्लेखनीयम् अस्ति यत् गतवर्षस्य अक्टूबरमासे न्यायालयेन पर्यावरणमन्त्रालयस्य प्रतिवेदनस्य कार्यान्वयनं स्थगनम् कृत्वा स्वतन्त्रविशेषज्ञैः नवीनसमीक्षां कर्तुम् आदेशः प्रदत्तः। अपेक्ष्यते यत् अस्याः समितेः प्रतिवेदनम् अरावलीक्षेत्रस्य संरक्षणे, विकासे तथा पर्यावरणीयसन्तुलनस्य रक्षणे भविष्यनिर्णयेषु महत्त्वपूर्णां भूमिकां निर्वहिष्यति।

# धर्मगुरु दलाईलामावर्याय ग्रैमीपुरस्कारः, उस्ताद- अमजद अलीखानेन सम्मानितम्

**हिमसंस्कृतवार्ताः- धर्मशाला।** तिब्बतीधर्मगुरुः दलाईलामामहोदयः बुधवासरे मैक्लोडगञ्जक्षेत्रे ग्रैमीपुरस्कारेण विभूषितः। एषः सम्मानः प्रसिद्धेन भारतीय-शास्त्रीयसङ्गीतज्ञेन सरोदवादकेन च उस्ताद- अमजद-अलीखानेन स्वपरिवारेण सह धर्मगुरुणा सह मेलनावसरे प्रदत्तः।



उस्ताद-अमजद-अलीखानः अवदत् यत् दलाईलामा-महोदयाय ग्रैमीपुरस्कारस्य प्राप्तिः वैश्विकस्तरे एका महती उपलब्धिः वर्तते। तेन संसूचितं यत् पुरस्कारं प्राप्य धर्मगुरुः अतीव प्रसन्नः दृष्टः। अस्मिन् अवसरे सः दलाईलामा-महोदयस्य आशीर्वादमपि गृहीतवान्। अमजद-अलीखानः प्रतिपादितवान् यत् तस्य दलाईलामा- महोदयस्य च सम्बन्धः चत्वारि दशकं प्राचीनः अस्ति। तेन उक्तं यत् धर्मगुरोः अशीतितमे (८०) जन्मदिवसे तेन देहल्यां विशेषा प्रस्तुतिः अपि दत्ता आसीत्। सः युवभ्यः सन्देशं यच्छन् अवदत् यत् सहनशीलता धैर्यं च जीवनस्य सर्वोत्तमा कुञ्जिका स्तः। अस्मिन् अवसरे अमजद- अली- खानस्य पुत्रौ अयान-अलीबङ्गशः अमान- अली- बङ्गशश्च अपि उपस्थितौ आस्ताम्। उभाभ्यां कथितं यत् दलाईलामा-महोदयेन सह मेलनं तयोः कृते अविस्मरणीयः अनुभवः आसीत्। तौ संसूचितवन्तौ यत् धर्मगुरोः आशीर्वादं प्राप्य तौ अतीव हर्षितौ अभवताम्, पुरस्कारस्वीकरणसमये च दलाईलामा- महोदयस्य वदने विशेषा प्रसन्नता संदृष्टा। उल्लेखनीयं वर्तते यत् उस्ताद- अमजद- अली- खानः देशस्य प्रतिष्ठितेषु शास्त्रीयसङ्गीतज्ञेषु अन्यतमः अस्ति। वर्षे १९९१ मध्ये भारतसर्वकारेण सः 'पद्मभूषण' सम्मानेन अलङ्कृतः कृतः आसीत्।

# ७१४ पी. जी. टी., १०२ डी. पी. ई. पदानां च कृते शीघ्रं भविष्यति एल. डी. आर. नियुक्तिप्रक्रिया- रोहितठाकुरः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे शिक्षकाणां पदोन्नतिं नियुक्तिप्रक्रियां च गतिं प्रदातुं सर्वकारः शीघ्रमेव ७१४ पी.जी.टी., १०२ डी. पी. ई. पदेषु च एल. डी. आर. माध्यमेन नियुक्तिप्रक्रियाम् आरप्स्यते। शिक्षामन्त्रिणः रोहितठाकुरस्य अध्यक्षतायां बुधवासरे सचिवालये शिक्षाविभागस्य समीक्षा-उपवेशनं सम्पन्नम्। उपवेशने शिक्षामन्त्रिणा प्रकथितं यत् विभिन्नानां श्रेणीनां ११३१ एस. एम. सी. शिक्षकाणां नियुक्तयः पूर्वमेव एल. डी. आर. श्रेण्याः माध्यमेन कृताः सन्ति। तेन सङ्गणकशिक्षकैः सम्बद्धानां लम्बितानां प्रकरणानां समाधानाय आवश्यकेषु नियमेषु संशोधनं कर्तुमपि निर्देशः दत्तः। शिक्षामन्त्रिणा अधिकारिणः आदिष्टाः यत् राज्यलोकसेवायोगाय राज्यचयन- आयोगाय च प्रेषितानां रिक्तानां शिक्षकपदानां नियुक्तिप्रक्रियायां तीव्रता आनेया। छात्रेभ्यः 'टैबलेट' वितरणयोजनायाः समीक्षां कुर्वन् रोहितठाकुरः विभागं प्रक्रियां गतिशीलं कर्तुं प्रत्यक्ष- लाभहस्तान्तरण- प्रणाल्या माध्यमेन धनराशिं शीघ्रं प्रदातुं निर्देशितवान्। सः अवदत् यत् पात्रच्छात्राः स्वस्याः आवश्यकतायाः रुचेश्च अनुसारम् उपकरणं क्रेतुं सुविधां प्राप्नुयुः, उपनिदेशकाः एतत् सुनिश्चितं कुर्युः यत् प्रदत्तराशेः उपयोगः निर्धारितोद्देश्याय एव भवेत्। शिक्षामन्त्रिणा संसूचितं यत् वर्तमाने शैक्षणिकसत्रे प्रदेशस्य १४८ शासकीयविद्यालयाः सी. बी. एस. ई. संस्थया सह सम्बद्धाः संजाताः सन्ति। भविष्ये अधिकाः विद्यालयाः सी. बी. एस. ई. पाठ्यक्रमेण सह योजयिष्यन्ते येन छात्रेभ्यः गुणवत्तापूर्णा शिक्षा उपलभ्येत। उपवेशने अधिकारिभिः विज्ञापितं यत् वर्षे २०२३, २०२५ च इत्यस्य विपदौ (आपदा) क्षतिग्रस्तानां विद्यालयानां पुनर्निमाणाय परिष्कारकार्याय च लोकनिर्माणविभागाय हिमुडा- संस्थायै च १९ कोटिरूप्यकाणि प्रसारितानि सन्ति। शिक्षामन्त्रिणा अ-कार्यशील-केन्द्रीयविद्यालयेभ्यः सम्बद्धाः लम्बिताः औपचारिकताः शीघ्रं पूरयित्वा तान् सुचारुरूपेण सञ्चालयितुम् आदिष्टम्। उपवेशने शिक्षासचिवः राकेशकंवरः, समग्रशिक्षायाः परियोजनानिदेशकः राजेशशर्मा, विद्यालय- शिक्षा- निदेशकः आशीषकोहली, उच्चशिक्षानिदेशकः डॉ. हरीशकुमार अवस्थी च उपस्थिताः आसन्।

# हिमाचले प्रवेशकरस्य विरोधः; निहङ्गसिखैः मोडा- शुल्कपट्टिकायाः (टोल प्लाजा) समीपे प्रारब्धः 'खालसा एन्ट्री टैक्स' इति



हिमसंस्कृतवार्ताः- बिलासपुरम्। हिमाचल-पञ्जाबसीम्नि स्थिते 'मोडा' इति ग्रामे राष्ट्रीय- राजमार्ग- प्राधिकरणस्य (NHAI) शुल्कपट्टिकायाः (टोल प्लाजा) समीपे पञ्जाबसीम्नि निहङ्गसिखैः “खालसा एन्ट्री टैक्स” इति नाम्ना वाहनानि अवरुद्ध्य धनसङ्ग्रहः आरब्धः। अस्मिन् अन्तराले निहङ्गसिंहः अच्छरसिंहः स्वसहचरैः सह महत्यां सङ्ख्यायां तत्र प्राप्तवान्, वाहनानि च अवरुद्ध्य सर्वकल्याणाय अर्थात् “सरबत के भले” इति नाम्ना स्वैच्छिकयोगदानस्य (दानस्य) सङ्ग्रहणं प्रारभत। वाहनानां सुदीर्घाणां पङ्क्तीनां कारणात् राष्ट्रीयराजमार्गे प्रखरः गतावरोधः (जाम) सञ्जातः, येन यात्रिणः महतीं समस्यां सम्मुखीकृतवन्तः। तस्मिन् स्थाने सम्भाषणकाले निहङ्गसिंहः अछरसिंहः अवदत् यत् कश्चनपि जनः बलात् न अवरुद्ध्यते, न च किमपि अन्याय्यं क्रियते। तेन प्रतिपादितं यत् जनाः स्वेच्छया यद् दानं यच्छन्ति, तस्य उपयोगः सर्वकल्याणाय धार्मिककार्याणां च कृते करिष्यते। अच्छरसिंहः अग्रे स्पष्टीकृतवान् यत् यावत् हिमाचलप्रदेश- सर्वकारः पञ्जाबप्रदेशतः आगच्छतां जनानाम् उपरि आरोपितं भूरिभारकरं शुल्कं च प्रतिनिवर्तयति (वापस नहीं लेता), तावत् तेषाम् एतद् अभियानं प्रचलिष्यति। तेन आरोपः कृतः यत् हिमाचले भ्रमणार्थं गतानां पञ्जाबवासिभिः सह कृतेन अन्यायेन, कैश्चित् दुष्टतत्वैः साकं क्रियमाणेन भेदभावपूर्णव्यवहारेण क्षुब्धाः भूत्वा एतत् पदं प्रचालितम्। तस्य कथनम् आसीत् यत् अस्याः कार्यविधेः माध्यमेन हिमाचलसर्वकाराय पञ्जाबवासिनाम् असन्तोषस्य समस्यानां च अनुभूत्यै प्रयासः विहितः। सः अवदत् यत् वयं केवलं अल्पकालाय एव हिमाचलसर्वकाराय 'ट्रेलर' प्रदर्शितवन्तः स्म। स्थितेः समीक्षणाय श्रीकीरतपुरसाहिबक्षेत्रस्य आरक्षकनिरीक्षकः (थाना प्रभारी) राहुलशर्मावर्यः अपि तत्र प्राप्नोत्। सः स्थितिं नियन्त्र्य निहङ्गसिंहान् प्रबोध्य तैः आरब्धं 'खालसा टोल टैक्स' इति करप्रथां स्थगितवान्।

# सहस्रकोटिरूप्यकाणां निवेशाय स्वीकृतिः, त्रयोविंशति-नूतनपरियोजनाभिः ३१४६ जनेभ्यः उद्योग-अवसराः




**हिमसंस्कृतवार्ता, राघव नाथ झा।** प्रेषकः: राघव नाथ झा। बिहार-औद्योगिकक्षेत्र-विकास-प्राधिकरणस्य (बियाडा) परियोजना-समाशोधन-समित्या (पीसीसी) राज्ये औद्योगिकविकासं गतिशीलं कर्तुं त्रयोविंशति (२३) नूतनपरियोजनाभ्यः स्वीकृतिः प्रदत्ता। एतासु षोडश (१६) औद्योगिकघटकाः तथा च सप्त (७) चतुस्तारकीय-पञ्चतारकीय-होटलपरियोजनाः सम्मीलिताः सन्ति। एतासां परियोजनानां कृते ३१.७८ एकड-परिमितं भूमिक्षेत्रम् आवंटितं, येन प्रायः ९९२.६३ कोटिरूप्यकाणां निवेशः भविष्यति, ३१४६ जनेभ्यः च प्रत्यक्षं रोजगार-अवसराः सृजिताः भविष्यन्ति।अस्याः उपवेशनस्य अध्यक्षता उद्योगविभागस्य सचिवेन, 'बियाडा' तथा 'एआईडीए' इत्यनयोः प्रबन्धनिदेशकेन कुन्दनकुमारमहोदयेन कृता। उद्योगमन्त्री श्रेयसी सिंह महोदया अवदत् यत्- "नूतनाः औद्योगिकपरियोजनाः बिहारराज्यस्य आर्थिकविकासं नूतनदिशं प्रदास्यन्ति, स्थानीययुवकानां कृते च उद्योगस्य कौशलस्य च अवसराणां विस्तारं करिष्यन्ति।"स्वीकृताः परियोजनाः खाद्यप्रसंस्करणं, तण्डुलघट्टनं, वस्त्रोद्योगः, लोहपट्टिका-निर्माणं, संवलितपत्रं, सामान्यविनिर्माणं तथा च hotel-उद्योगसदृशैः क्षेत्रैः सम्बद्धाः सन्ति। एताः औद्योगिकघटकाः फतुहा, बैजनाथपुर, गोरौल, समस्तीपुर, डोनार, बरारी, मरंगा, मुजफ्फरपुर, पाटलिपुत्र तथा च हाजीपुर इत्यादिषु विभिन्न-औद्योगिकक्षेत्रेषु स्थापिताः भविष्यन्ति। कुन्दनकुमारमहोदयः कथितवान् यत्- "राज्यसर्वकारः निवेशकेभ्यः पारदर्शिन्या समयबद्धया च प्रक्रियया औद्योगिकभूखण्डान् उपलब्धं कारयति। उत्तम-आधारभूतसंरचनायाः, सुदृढ-सम्पर्कमार्गस्य, सरलायाः प्रक्रियायाः च कारणेन बिहारराज्यं निवेशार्थं आकर्षकं गन्तव्यस्थानं जायमानं अस्ति।"एताभिः नूतनपरियोजनाभिः रोजगारसृजनेन सह परिवहन-लॉजिस्टिक्स-पैकेजिंग-भाण्डागार-सेवाक्षेत्रेषु अपि आर्थिकगतिविधयः वर्धिष्यन्ते। खाद्यप्रसंस्करणात्, कृषि-आधारित-उद्योगेभ्यः च कृषकाः उत्तमं आपणं मूल्यसंवर्धनस्य च लाभं प्राप्स्यन्ति इति आशा अस्ति। अपरपक्षे, होटलपरियोजनाभिः व्यावसायिकपर्यटनं निवेशसम्बद्धाः गतिविधयः च अपि प्रोत्साहनं प्राप्स्यन्ति।

विशेषज्ञानां मतम् अस्ति यत्- "प्रायः एकसहस्रकोटिरूप्यकाणां निवेशः विविधक्षेत्रेषु प्रस्ताविताः परियोजनाः च बिहारस्य औद्योगिकप्रतिष्ठां सुदृढां विधास्यन्ति, प्रादेशिकविकासं च नूतनवेगेनापूरयिष्यन्ति। तथापि, एतासां परियोजनानां वास्तविकी सफलता तासां समयबद्धे क्रियान्वयने, रोजगारसृजने च निर्भरा अस्ति।"

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया एका सुन्दरी कथा श्रुता। मुम्बापुर्याः मलिनवस्त्याम् जातः कश्चित् तन्त्रज्ञः स्वपरिश्रमेण जर्मनदेशं प्रति गतवान् अस्ति। तेन स्वकीया संवर्धनावस्था वर्णिता।

**नन्दिनी-** सत्यम्, तस्य उद्यमः प्रशंसनीयः अस्ति। किन्तु अपरत्र, एकेन उद्योगप्रार्थकेन दुःखदः अनुभवः प्राप्तः। सार्धैकमासं व्याप्य साक्षात्कारप्रक्रिया कृता, परन्तु कार्यग्रहणात् एकघण्टापूर्वमेव तस्य नियोगादेशः संस्थया निरस्तः।

**काव्या-** अहो, एतत् तु सर्वथा अयोग्यं कृतम्। नियोगाभावे जनाः अन्यं मार्गं चिन्वन्ति। पश्यतु, एकेन भूतपूर्वेण आरक्षकेण नूतनः मार्गः आश्रितः। तेन क्षीरोद्योगे प्रतिदिनं नवतिसहस्ररूप्यकाणां व्यापारः क्रियते। सः स्वकीयं स्वप्नं साकारं कृतवान् अस्ति।

**नन्दिनी-** धन्यः सः आरक्षकः यः स्वावलम्बी जातः। कृषिकर्मणि पशवः सदा सहायकाः भवन्ति, किन्तु वन्यजन्तवः भीतिं जनयन्ति। श्रुतं मया यत् अमेरिकादेशस्य मन्त्री आर. एफ. के. महोदयः स्वगृहोद्याने एव वन्यसर्पेण दष्टः। तेन सर्पं ग्रहीतुं प्रयासः कृतः।

**काव्या-** आम्, सः रक्षितः अस्ति इति वार्ता मया पठिता। अद्यतन्यः वार्ताः अत्रैव समाप्ताः। मिलामः श्वः।

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# ११ मेगा-उद्यानानि (मेगा पार्क), ३८ खाद्य-उद्यानानि (फूड पार्क), ५० सहस्र-एकड-परिमितं भूमि-कोषम् (लैंड बैंक): औद्योगिक-बिहारस्य नूतन-उत्पतनम्



हिमसंस्कृतवार्ता, राघव नाथ झा। बिहारसर्वकारेण राज्यं औद्योगिकनिवेशस्य रोजगारस्य च प्रमुखकेन्द्रं विधातुं महच्चरणं प्रस्थापितम्। मुख्यमन्त्रिणः नीतीशकुमारस्य अध्यक्षतायाम् उद्योगविभागस्य समीक्षा-उपवेशने एकादश (११) मेगा-उद्यानानि, सर्वेषु अष्टात्रिंशत् (३८) जनपदेषु खाद्य-उद्यानानि (फूड पार्क) तथा च पञ्चाशत्-सहस्र (५०,०००) एकड-परिमितं भूमि-कोषं (लैंड बैंक) विकसितं कर्तुं कार्यस्य गतिं वर्धयितुं निर्देशः प्रदत्तः।सर्वकारस्य उद्देश्यम् उद्योगेभ्यः भूमेः उपलब्धतां सुनिश्चितां कर्तुं, निवेशकेभ्यः समयबद्धाः सुविधाः प्रदातुं, 'एमएसएमई' तथा 'स्टार्टअप' क्षेत्राणि सुदृढानि विधातुं तथा च वस्त्रोद्योग-खाद्यप्रसंस्करणोद्योगान् प्रोत्साहनं दातुं वर्तते। मुख्यमन्त्री अधिकारिणः निवेशकानां समस्यानां त्वरित-निवारणाय, उद्योगजगता सह नियमित-संवादाय तथा च प्रोत्साहनराशेः समये भुगतानं सुनिश्चितं कर्तुं समादिष्टवान्।एतासां योजनानां क्रियान्वयनेन बृहत्परिमाणे निवेशाकर्षणं, युवकानां कृते उद्योग-अवसराणां वर्धनं, कृषकेभ्यः उत्तम-आपणस्य (बाजार) प्राप्तिः तथा च ग्रामीण-अर्थव्यवस्थायाः कृते नूतनवेग-प्रदानं सम्भाव्यते। खाद्य-उद्यानानि कृषिक्षेत्र-उद्योगक्षेत्रयोः मध्ये सुदृढसेतोरूपेण कार्यं विधास्यन्ति, अपरपक्षे भूमि-कोषः सरला अनुमोदन-व्यवस्था च निवेशकानां विश्वासं वर्धयितुं सहायका भविष्यति।एषः प्रयासः सूचयति यत् बिहारराज्यम् इदानीं केवलं कृषि-आधारित-अर्थव्यवस्थायां सीमितं भवितुं न इच्छति, अपितु कृषि-औद्योगिक-विकास-प्रारूपं (मॉडल) प्रति तीव्रगत्या अग्रे वर्धते। यदि ११ मेगा-उद्यानानि, ३८ खाद्य-उद्यानानि तथा च ५० सहस्र-एकड-परिमितं भूमि-कोषम् इत्यादयः योजनाः प्रभावीरीत्या धरातले अवतरन्ति, तर्हि बिहारराज्यम् आगामिवर्षेषु निवेश-उद्योग-रोजगारक्षेत्रेषु नूतनां प्रतिष्ठां स्थापयितुं शक्नोति।बिहारराज्यम् अधुना केवलं निवेश-याचकं न, अपितु निवेश-आकर्षकं राज्यं भवितुं निर्णायकं चरणं वर्धयति।

# बिहारे उद्यानक्रान्तेः सज्जता, पादपशाला-विकासः (नर्सरी), कृषि-उद्यमिता च प्राप्स्यतः नूतनबलम्



हिमसंस्कृतवार्ता, राघव नाथ झा। बिहारसर्वकारेण उद्यानिकी, पादपशाला-विकासं (नर्सरी), कृषि-आधारित-उद्यमितां च नूतनगतिं प्रदातुं महती सुदृढा च पहलः (प्रयासः) आरब्धा। कृषि मन्त्री विजय कुमार सिन्हा महोदयः कृषिभवने आयोजितायां समीक्षा-उपवेशने राज्यभरं परितः आधुनिकानां पादपशालानां विकासाय, कृषिविभागस्य अतिक्रान्तायाः भूमेः मुक्तेः तथा च उद्यानिकीक्षेत्रं रोजगारस्य स्वरोजगारस्य च सुदृढम् आधारं विधातुं निर्देशं दत्तवान्।मन्त्री अवदत् यत् कृषकाणां कृषि-उद्यमिनां च हितानि सर्वोपरि सन्ति, कृषि-विकासेन सम्बद्धासु नीतिषु च निरन्तरता भवेत्। सः फल-शाक-औषधीय-सुगन्धित-पादपानां शालाः (नर्सरी) वर्धयितुं, कृषकेभ्यः अनुदानित-मूल्येन पादपानाम् उपलब्धतां सुनिश्चितां कर्तुं तथा च उद्यानिकी-आधारित-प्रारम्भिक-उद्योगानां ('स्टार्टअप') प्रोत्साहनाय बलं दत्तवान्।अस्यां गोष्ठ्यां बिहारस्य पारम्परिकाणां विशिष्टानां च सस्यानां (फसलों) नूतनप्रतिष्ठा-प्रदानाय कार्ययोजनाविषये अपि विमर्शः जातः। 'दीघा मालदा' इति आम्रफलस्य संरक्षण-संवर्धनेन सह 'बथुआ आम', 'जर्दा आम', 'दुधिया आम', 'मालभोग' तथा च 'चीनिया कदली' (केला) इत्यादिभ्यः 'भौगोलिक-सङ्केतक-उपाधिं' (जीआई टैग) प्रापयितुं प्रयासान् तीव्रान् कर्तुं समादिष्टम्। कृषिमन्त्री मधुमक्षिकापालनं मधु-उत्पादनं च ग्रामीण-अर्थव्यवस्थायाः मुख्यस्तम्भं वर्णयन् 'मधु-प्रसंस्करण-घटकानां' (हनी प्रोसेसिंग यूनिट्स) विस्तारे बलम् अददात्। सः कथितवान् यत् मुजफ्फरपुरस्य सुप्रसिद्धां लतिकां (लीची) इव लीची-उद्यानेषु उत्पादितं मधुमपि राष्ट्रिय-अन्तर्राष्ट्रिय-स्तरेषु ख्यातिं प्रापयितुं कार्यं विधास्यते।

## कः अस्ति महत्तमा सन्देशः?

एषः प्रयासः केवलं पादपशाला-विकासाय वा पादपोत्पादनाय सीमितः नास्ति, अपितु कृषिं उद्यमितया, प्रसंस्करणात्मकेन कार्येण, ब्रान्डिङ्ग-प्रक्रियया आपणस्य च व्यवस्थया सह योक्तुं व्यापक-नीतेः अङ्गं वर्तते। यदि पादपशाला-विकासः, जीआई-टैग-उपाधिः, मधु-प्रसंस्करणं तथा च कृषि-स्टार्टअप-अभियानम् इत्यादयः योजनाः प्रभाविद्रूपेण धरातले सिद्ध्यन्ति, तर्हि बिहारराज्यम् उद्यानिकी-आधारित-अर्थव्यवस्थायाः ग्रामीण-रोजगारस्य च क्षेत्रे नूतनं दृष्टान्तं (मिसाल) स्थापयितुं शक्नोति। बिहारराज्यम् इदानीं केवलं कृषि-उत्पादनं वर्धयितुं न, अपितु कृषिं लाभप्रदम् उद्यमं कृत्वा वैश्विकप्रतिष्ठां प्रदातुं निर्णायकं चरणं प्रस्थापयति।

# विश्वसाइकिलदिवसे जागरुकता-रैली (साइकिल-यात्रा) आयोजिता




हिमसंस्कृतवार्ता, विश्वमोहन झा दरभङ्गा। विश्वसाइकिलदिवसस्य अवसरे ललितनारायणमिथिला-विश्वविद्यालयस्य राष्ट्रियसेवाप्रकल्पस्य (NSS) प्रकोष्ठस्य तत्त्वावधाने मङ्गलवासरे एका साइकिल-जागरुकता-रैली (साइकिल-यात्रा) निष्कासिता। विश्वविद्यालयस्य चिकित्साधिकारी डॉ. गीतेन्द्रठाकुरः तथा च राष्ट्रियसेवाप्रकल्पस्य समन्वयकः डॉ. आर. एन. चौरसिया महोदयः हरितपताकां प्रदर्श्य यात्रां प्रस्थापितवन्तौ।एषा यात्रा विश्वविद्यालयपरिसरतः आरभ्य श्यामामन्दिरं, भण्डारचोकमार्गं, रामबागं, कन्हैयाकोठीं, कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयं, बाघमोरं, नरगोनाप्रासादं (नरगोना पैलेस) तथा च मनोकामनामन्दिरं सहितं विभिन्नान् क्षेत्रान् परितः अभ्रमत्। अस्मिन् अन्तरे भगीरथप्रयासकर्तारः प्रतिभाशालिनः "साइकिलं चालयन्तु-स्वास्थ्यं वर्धयन्तु", "साइकिलं स्वीकुर्वन्तु-तैलं (पेट्रोलियम) रक्षन्तु" तथा च "साइकिलं वर्तते सुलभं-स्वास्थ्ये भवति मोदकम्" इत्यादिभिः उद्घोषैः (नारा-माध्यमेन) जनान् जागरूकान् कृतवन्तः।डॉ. गीतेन्द्रठाकुर महोदयः अवदत् यत्- "नियमितरूपेण साइकिल-चालनेन स्थौल्यं (मोटापा), मधुमेहः, उच्चरक्तचापः तथा च कोलेस्ट्रॉल सदृशाः समस्याः नियन्त्रिताः भवन्ति।" अपरपक्षे डॉ. आर. एन. चौरसिया महोदयः कथितवान् यत्- "साइकिल-चालनं सरलं, सुलभं, पर्यावरणानुकूलं च व्यायामरूपं वर्तते, यत् शरीरं स्वस्थं राखितुं सहैव जीवनशैल्यां सकारात्मकं परिवर्तनम् आनयति।"अस्यां यात्रायां विभिन्नानां महाविद्यालयानां राष्ट्रियसेवाप्रकल्पस्य अधिकारिणः, स्वयंसेवकाः अन्ये च भागिनः सम्मिल्य शताधिकाः (१००+) जनाः सहभागित्वं निरूढवन्तः। सर्वेभ्यः सहभागिभ्यः प्रमाणपत्रमपि प्रदत्तम्। कार्यक्रमस्य अन्ते अमितकुमारझा महोदयेन धन्यवादज्ञापनं कृतम्।

# "लौकिकन्यायकोशः"

# "अग्निकुण्डन्यायः"



पूजायाः कृते आवश्यकानि जलम् इत्यादीनि वस्तूनि शीघ्रम् उपलब्धानि भवन्तु इति एकः ब्राह्मणः एकं कुम्भं जलेन् पूरयित्वा तस्मिन् एव कुम्भे अग्निम् अपि स्थापितवान् रात्रौ। प्रातःकाले जलम् अग्निः तथा इतराणि वस्तूनि शीघ्रम् एव एकत्र लभ्यन्ते इति आशया सः धावित्वा आगतः परं सः किं पश्यति? अग्नेः ज्वलदङ्गाराः शान्ताः अभवन्, कुम्भे वर्तमानं जलम् चापि मलिनमभवत्। येषां प्रपञ्चज्ञानं न भवति तादृशानां मन्दबुद्धीनां जनानां विषये अस्य न्यायस्य उपयोगः भवति। **डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**




# वास्तविकः दायः एषैव - यत् अस्माकं आगामिनी पीढी अस्मत्तः श्रेष्ठा भवेत्

अद्य अम्मा अतिप्रातः उत्थितवती आसीत्। रात्रौ निद्रा तु अल्पा एवाभवत्, परन्तु मनसि काचित् अपूर्वा शक्तिः आसीत्। यथा अद्य कोऽपि महत्तरः निर्णयः करणीयः स्यात्। स्नात्वा सा पूजायां उपविष्टा, नेत्रे निमील्य भगवन्तं प्रार्थितवती च, "यत् समीचीनं स्यात्, तमेव मार्गं दर्शयतु।" ततः शनैः पर्यङ्कस्य (पलंग के) अधः स्थापितं पुरातनं लोहमयं मञ्जूषां (संदूकं) बहिः आकृष्टवती। तस्यां किट्टं (जंग) संलग्ना आसीत्, किन्तु तस्याः अन्तः पीढीनां कथाः सुप्ताः आसन्। कम्पमानैः हस्तैः कपाटिकां (ताले) उद्घाटितवती। रक्तवस्त्रेषु बद्धाः पोट्टलिकाः। रजतस्य (चाँदी के) चमसाः, चषकाः, घटिकाः, कुङ्कुमपात्रं, श्वश्रूः (सास का) कुञ्चिकाधारकं च। प्रत्येकं वस्तु स्पृष्ट्वा स्मृतयः जागृताः अभवन्। एषः चषकः विवाहसमयस्य... एषः चषकः पुत्रस्य जन्मोत्सवस्य... एतद् कुङ्कुमपात्रं च श्वश्रूः आशीर्वादः। पुत्र-स्नुषे (बेटा-बहू) नगरे वसतः स्म। बहुभ्यः वर्षेभ्यः परं स्नुषा दिनचतुष्टयाय आगता आसीत्। अम्मायाः मनः भरितम् अभवत्। सा अचिन्तयत्, अधुना एतां विरासतं (पैतृक-सम्पत्तिं) अस्याः हस्ते समर्प्य निश्चिन्ता भवेयम् इति। ह्यः सायङ्काले स्नुषाम् आहूतवती, मञ्जूषाम् उद्घाटितवती, प्रत्येकस्य वस्तुनः कथां श्राशितवती च। नेत्रयोः चमकः आसीत् - "पुत्रि, एषा कुलस्य संज्ञिका अस्ति। एतां सुरक्षितां स्थापय।" परन्तु स्नुषा मौनम् अतिष्ठत्। ततः शनैः अवदत्, "अम्ब, क्षमस्व। अहं प्रकोष्ठात्मके गृहे (फ्लैट मध्ये) वसामि। न तु धनगोपने (लॉकर मध्ये) स्थानमस्ति, न च अहम् एतानि प्रतिदिनं प्रयोक्तुं शक्नोमि। अद्यत्वे जनाः पुरातनानि वस्तूनि रक्षितुं न शक्नुवन्ति। यदि कुत्रचित् विनष्टानि विक्रितानि वा भवेयुः, तर्हि भवत्यै एव अधिकं दुःखं भविष्यति। अम्मा स्तब्धा अभवत्। हस्ते गृहीता पोट्टलिका कम्पिता अभवत्। अनुभूतं यत् सम्पूर्णजीवनस्य परिश्रमस्य किमपि मूल्यं न अवशिष्टम्। कक्षे नीरवता आसीत्। तदैव द्वारघण्टिका वादिता। अम्मा चकिता अभवत्। पोट्टलिकां गृहीत्वा द्वारं प्रति चलितवती। परन्तु अस्मिन् वारे नेत्रयोः अश्रूणि न, अपितु एकः दृढः निर्णयः आसीत्। द्वारम् उद्घाटितवती। सम्मुखे कोऽपि सौवर्णिकः (सुनार) न, अपितु महल्लस्य (मोहल्ले के) विद्यालयस्य प्रधानाचार्या स्थिता आसीत्। अम्मा मन्दं हसितवती, "भगिनि, आगच्छतु। मया ह्यः दूरभाषः कृतः आसीत् खलु। एतत् पश्यतु," सा पोट्टलिकां उद्घाटितवती, "एतानि रजतपात्राणि सन्ति। त्रिपीढीपुरातनानि। अहम् इच्छामि यत् एतानि विलाप्य (गलाकर) भवतीनां विद्यालयस्य मेधाविनीनां बालिकानां कृते छात्रवृत्ति-पदकानि (स्कॉलरशिप मेडल) कारयेत्। प्रतिवर्षं पञ्च बालकाः प्राप्नुयुः - 'मातामही-आशीर्वाद-पदकम्' इति।" प्रधानाचार्यायाः नेत्रे अश्रुपूर्णे अभवताम्। स्नुषा अपि पृष्ठतः स्थिता शृणोति स्म। अम्मा स्नुषायाः हस्तं गृहीतवती, "पुत्रि, दायः पात्राणि न, अपितु विचाराः भवन्ति। त्वं सत्या आसीः। धनगोपने (लॉकर मध्ये) स्थापयित्वा एतानि मृतानि अभविष्यन्। अधुना एतानि प्रतिवर्षं कस्याश्चित् कन्यायाः उत्साहं वर्धयिष्यन्ति। वास्तविकः दायः एषैव - यत् अस्माकं आगामिनी पीढी अस्मत्तः श्रेष्ठा भवेत्।"स्नुषा अम्मां कण्ठे आश्लिष्टवती (गले लगा लिया)। तस्मिन् दिने अम्मा अवगतवती - सा अन्तिमा स्वामिनी न, अपितु प्रथमा निर्मात्री आसीत्। यया रजतं स्मृतिः न, अपितु भविष्यं कृतम्।

**शिक्षा-** दायः सः न यं वयं दृढं धारयामः। दायः सः अस्ति यां वयं अग्रे प्रेषयामः। समये परिवर्तिते सति पद्धतिं परिवर्तयन्तु, परन्तु संस्कारान् मा परिवर्तयन्तु।

# निजीविद्यालयाः प्रतिवर्षं केवलं पञ्चप्रतिशतं शुल्कमेव वर्धयितुं शक्नुवन्ति, विगतत्रिभ्यः वर्षेभ्यः वर्धितं अतिरिक्तशुल्कं प्रतिप्रदेयम् भविष्यति



पंजाबसर्वकारेण प्रदेशस्य निजीविद्यालयेषु (प्राइवेट-स्कूल) नियन्त्रणाय सज्जा कृता अस्ति। बुधवासरे चण्डीगढनगरे मुख्यमन्त्रि-आवासे पत्रकारसम्मेलनं (प्रेस कान्फ्रेंस) कृत्वा मुख्यमन्त्री भगवन्तमानः उक्तवान् यत् निजीविद्यालयाः इदानीं स्वेच्छया शुल्कवर्धनं कर्तुं न शक्ष्यन्ति। तेन सह ते पुस्तकानि वस्त्राणि (ड्रेस) च कस्याश्चित् विशेषविपणात् (दुकान से) क्रेतुं अभिभावकान् विवशान् अपि कर्तुं न शक्ष्यन्ति। एतदर्थं सर्वकारः नियमं (कानूनं) आनयति, यस्य अन्तर्गतं निजीविद्यालयाः वर्षे अधिकतम् (ज्यादा से ज्यादा) पञ्चप्रतिशतं (५%) शुल्कमेव वर्धयितुं शक्ष्यन्ति। न केवलम् एतत्, यैः विद्यालयैः गतेषु त्रिषु वर्षेषु पञ्चदशप्रतिशततः (१५%) अधिकं शुल्कं वर्धितम्, तैः अतिरिक्तं शुल्कं अभिभावकेभ्यः प्रतिप्रदेयं भविष्यति। मुख्यमन्त्रिणा मानेन उक्तं यत् एतदर्थं सर्वकारः कठोरं नियमं प्रणेष्यति, यत् आगामीनि विधानसभासत्रे पारितं करिष्यते। एषः नियमः सर्वविधशुल्केषु प्रवृत्तः (लागू) भविष्यति। शुल्कं दातुम् असमर्थतायाः कारणात् अमृतसरनगरे द्वादशकक्ष्यायाः एकायाः छात्रायाः आत्महत्यायाः (सुसाइड) परं सर्वकारेण एषः निर्णयः गृहीतः। सर्वेषु विद्यालयेषु एषः नियमः प्रवृत्तः भविष्यति

मुख्यमन्त्री भगवन्तमानः अवदत् यत् वयं यं नियमं आनयामः, सः पंजाबे सर्वेषु विद्यालयेषु, येषु राष्ट्रियाः आन्तरराष्ट्रियाः (नेशनल व इंटरनेशनल) विद्यालयाः अपि सम्मिलिताः सन्ति, प्रवृत्तः भविष्यति। दिनद्वये एतत्सम्बन्धी अध्यादेशः (ऑर्डिनेंस) आगमिष्यति। ततः परं वर्षर्तु-सत्रे (मानसून सेशन) एतद्विषये नियमः आनेष्यते। मुख्यमन्त्रिणा मानेन सहैव उक्तं यत् शुल्कवर्धनसम्बन्धिन्तः याः अपि शिकायतः (अभियोगाः) अधुना यावत् डी.ई.ओ. (DEO) कार्यालयं प्राप्ताः, तासां जाञ्चः (अन्वेषणं) करिष्यते। यदि कापि त्रुटिः प्राप्यते, तर्हि सम्बन्धितविद्यालयस्य विरुद्धं दण्डनात्मिका कार्यवाही करिष्यते। सः अवदत् यत् विद्यालयाः कस्याश्चित् एकस्याः विशेषविपणात् बालकेभ्यः पुस्तकानि वस्त्राणि च क्रेतुं अभिभावकान् बाध्यं कर्तुं न शक्ष्यन्ति। तैः एतत्सम्बद्धा सर्वापि सूचना पूर्वमेव सार्वजनिका करणीया भविष्यति।

## कुवैत-विमानपत्तने ईरानीयाक्रमणे भारतीयस्य मृत्युः, त्रिषष्टिः (६३) जनाः आहताः, बहवः गम्भीराः, भारतीय-दूतावासस्य शोकप्रकटनम्

**वार्ता-अभिकरणानि (एजेंसियां) — तेहरान/वाशिंगटन डीसी**

कुवैत-अन्तरराष्ट्रीय-विमानपत्तने (इंटरनेशनल एयरपोर्ट) बुधवासरे ईरानीयेन द्रोण-आक्रमणेन (ड्रोन हमले से) एकस्य भारतीयनागरिकस्य मृत्युः अभवत्, यदा च त्रिषष्टिः (६३) जनाः आहताः (घायल) सन्ति। एतेषु बहूनां स्थितिः चिन्ताजनकीया अस्ति। कुवैतस्थेन भारतीय-दूतावासेन एतस्यां घटनायां गभीरः शोकः प्रकटितः।कुवैत-सर्वकारस्य स्वास्थ्यमन्त्रालयानुसारं, बहूनां जनानां शिरसि शरीरस्य अन्यभागेषु च गभीराः क्षतयः (चोटें) सञ्जाताः। आक्रमणेन विमानपत्तनस्य 'टर्मिनल-१' इति भागस्य महत् नुकसानं (व्यापकं प्रणाशं) अभवत्। तदनन्तरं सुरक्षादृष्ट्या किञ्चित्कालं यावत् विमानपत्तनस्य यातायातं (एयरपोर्ट ट्रैफिक) स्थगितम् अभवत्।एतस्मात् पूर्वं अमरीकी-सेनायाः केन्द्रीय-कमानेन (सेंट्रल कमांड) सूचितं यत् ईरानेन कुवैतदेशे स्थितानां अमरीकी-सैनिकानां उपरि पुनः द्रोण-आक्रमणाणि कृतानि। तथापि सर्वाणि आक्रमणाणि निष्फलानि (नाकाम) अभवन्। ईरानेन बुधवासरे कुवैत-बहरीन-देशान् प्रति क्षेपणास्त्राणि (मिसाइल) द्रोणाः च प्रक्षिप्ताः। ईरानस्य कथनम् अस्ति यत् तेन क्षेत्रे स्थिताः अमरीकी-वायुसेनाशिविराणि (एयरबेस), हेलिकॉप्टर-शिविराणि तथा च बहरीनदेशे अमरीकी-नौसेनायाः पञ्चम-निक्षेपस्य (फिफ्थ फ्लीट) मुख्यालयः लक्षीकृतः।